ल्युट्] 1 Anointing, smearing with, दन्तधावनमञ्जनं पूर्वाह्ण एव कुर्वीत Ms. 4. 152; mixing: unfolding, manifesting. -2 Collyrium or black pigment used to paint the eyelashes: विलोचनं दक्षिणमञ्जनेन संभाव्य R. 7. 8 salve: अमृत°कोऽयं दृशोरमृताञ्जनम् U. 4. 18 ambrosial salve: कुर्वन् °मेचका इव दिशो मेघः समुत्तिष्ठते Mk. 5. 8, 1. 34; (fig. also) अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥ Sik. 45; पटुतरविवेकाञ्जनजुषाम् Bh. 3. 84; cf. also दारिद्र्यं परमाञ्जनम्; (fig.) impurity, as in निरञ्जन, q. v. -3 Paint, a cosmetic ointment. -4 Magic ointment. -5 A special kind of material of the black pigment, such as antimony (used as collyrium, lamp-black &c. (सौवीर) -6 Ink. -7 Fire. -8 Night. -9 (नम्, ना) (Rhet.) A suggested meaning; also the process by which such meaning is suggested. It is the power of suggestion (founded on अभिधा or लक्षणा denotation or indication), by which something else is understood from a word which, though having more meanings than one, has been restricted to a single meaning by relations of conjunction, disjunction &c. (संयोग, विप्रयोग, साहचर्य, विरोधिता &c.), or, briefly, the use of a word of several meanings in a special sense determined by the context; *e. g.* सशङ्खचक्रो हरिः the adjective restricts Hari to mean 'Viṣṇu' alone, and not a 'lion' or 'monkey'; so रामलक्ष्मणौ दाशरथी, रामार्जुनौ भार्गवकार्तवीर्यौ &c.; cf. अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते। संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्॥ K. P. 2., S. D. 23-6: See व्यञ्जना also. -Comp. -अधिका [अञ्जनादधिका कृष्णत्वात्] a kind of lizard. -अद्रिः-गिरिः (कर्म.) [अञ्जनमिव कृष्णः गिरिः] N. of a mountain, See नीलगिरि. -अम्भस् *n.* eye-water. -केशी [अञ्जनमिव केशो यस्याः] N. of a vegetable perfume (हट्टविलासिनीनामकं गन्धद्रव्यं यत्संयोगात्केशस्यातीव कृष्णत्वम् (Mar. नखला). -त्रितयम् (Āyurveda) पुष्पाञ्जन, रसाञ्जन and कोलाञ्जन. -नामका [ष. त.] a swelling of the eye-lid, sty (Mar. रांजणवाडी). -मूलकः A variety of an inferior gem, deep-dark in colour. Kau. A. 2. 11. -शलाका a stick or pencil for the application of collyrium.

अञ्जकः N. of the son of Viprachitti: V. P.

अञ्जनकः A portion of the Vedas containing the word अञ्जन. -की N. of a medicinal plant.

अञ्जनता Identity. (Pātañjala Yogadarśana, I. 41).

अञ्जना N. of the female elephant of the north. -2 N. of the mother of Māruti or Hanūmat. [She was the daughter of a monkey named Kuñjara and wife of Kesarin, another monkey. She was in a former birth a celestial nymph by name Puñjikasthali and was born on earth owing to a curse. One day while she was seated on the summit of a mountain, her garment was slightly displaced, and the God of Wind being enamoured of her beauty assumed a visible form, and asked her to yield to his desires. She requested him not to violate her chastity, to which he consented; but he told her that she would conceive a son equal to himself in strength and lustre by virtue of his amorous desire fixed on her, and then disappeared. In course of time Añjanā conceived and brought forth a son who was called Māruti being the son of Marut.]

अञ्जनावती [अञ्जनं विद्यते अस्याः अधिककृष्णवर्णत्वात्] 1 N. of the female elephant of the north-east quarter. -2 N. of a tree कालाञ्जनवृक्ष.

अञ्जनिका [अञ्जना स्वार्थे कन्] 1 A species of lizard: a small mouse. -2 N. of the mate of the elephant सुप्रतीक.

अञ्जनी [अज्यते चन्दनकुङ्कुमादिभिरसौ, अञ्ज्-कर्मणि-ल्युट् ङीप्] 1 A woman decorated with the application of pigments, ointments, sandal &c., or one fit for such application. -2 [करणे-ल्युट्] N. of two plants कटुकावृक्ष and कालाञ्जनवृक्ष.

अञ्जलिः *m.* [अञ्ज्-अलि Uṇ. 4. 2] 1 A cavity formed by folding and joining the open hands together, the hollow of the hands; hence, a cavity. full of anything (changd to अञ्जल or °लि after द्वि and त्रि in द्विगु comp., P. V. 4. 102); न वार्यञ्जलिना पिबेत् Ms. 4. 63; सुपूरो मूषिकाञ्जलिः Pt. 1. 25; अरण्यबीजाञ्जलिदानलालिताः Ku. 5. 15; प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् Ve. 1. 1. a cavityful of flowers; so जलस्याञ्जलयो दश Y. 3. 105. 10 cavityfuls or libations of water; श्रवणाञ्जलिपुटपेयम् Ve. 1. 4. to be drunk by the cavity of the ear; अञ्जलिं रच्, बन्ध्, कृ or आधा fold the hands together and raise them to the head in supplication or salutation; बद्धः, कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः U. 3. 37. -2 Hence a mark of respect or salutation; कः शक्रेण कृतं नेच्छेदधिमूर्धानमञ्जलिम् Bk. 8. 84: वध्यतामभययाचनाञ्जलिः R. 11. 78. -3 A measure of corn = कुडव; another measure = प्रसृत, or one-half of a मानिका. -Comp. कर्मन् *n.* folding the hands, respectful salutation; लुब्धमर्थेन गृह्णीयात् क्रुद्धं चाञ्जलिकर्मणा Chāṇ. 33. -कारिका 1 an earthen doll making the अञ्जलि (?). -2 N. of a plant, Mimosa Pudica (लज्जालु) (Mar. लाजाळू). -पुटः-टम् the cavity formed by joining the hands together; hollowed palms of the hand.

अञ्जलिका [अञ्जलिरिव कायते प्रकाशते: कै-क टाप् Tv.]. 1 A small mouse. -2 The sensitive plant of Mimosa Pudica (Mar. लाजाळू). -3 An insect of the spider tribe (Mar. कांतीण). -कः 1 N. of one of Arjuna's arrows. -2 अञ्जल्याकारमुख (mouse-mouthed) arrow भल्लैरञ्जलिकैरपि Rām. 6. 45. 23. -वेध a fighting stratagem जानन्नञ्जलिकावेधं नापाक्रामत पाण्डवः Mb. 7. 26. 23.

अञ्जस् *n.* (-जः) [अनक्ति गच्छति मिश्रयति वा अनेन: अञ्ज् गतौ मिश्रणे च-असुन्] Speed, velocity, strength: fitness, propriety: ointment, preparation (?). -Comp. -पा drinking instantly इममञ्जस्पामुभये अकृण्वत Rv. 10. 92. 2. -सवः rapid preparation of Soma.

अञ्जस *a.* [अञ्ज्-असच्] Not crooked, straight; honest, upright.

अञ्जसा *adv.* (instr. of अञ्जस्) 1 Straight on. –2 Truly, correctly, accurately, properly, justly; साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा Ku. 6. 22 we do not know you rightly or correctly; विद्म हे शठ पलायनच्छलान्यञ्जसा R. 19. 31, न हि कश्चित्प्रियः स्त्रीणामञ्जसा Subhāṣita; मर्त्यमेवाञ्जसा वद Ms. 8. 101. –3 Directly (साक्षात्), –4 Soon, quickly, instantly; स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम् Ms. 2. 244. ...अञ्जसा तत्त्वतूर्णयोः। Nm. वशमानितुमञ्जसा। Śiva. B. 25. 1. –**Comp.** –**अयन** *a.* going straight on. –**कृत** *a.* [तृ. अलुक्] done rightly or justly.

अञ्जसीन *a.* [अञ्जस्-ख] Ved. Straight forward, going straight on. स्तुतिं विन्दत्यञ्जसीनाम् Rv. 10. 32. 7.

अञ्जि *a.* Ved. [अञ्ज्-इन्] Unctuous, slimy; lubricated, shining, brilliant. –**ञ्जिः** 1 A mark made with sandal &c. a Tilaka mark; रोहिताञ्जिरनड्वान् Yaj. (रक्ततिलक). –2 A commander, sender &c. –**ञ्जिः** –**ञ्जी** *f.* 1 An ointment, pigment. –2 Colour, hue. –3 The sexual organ (?). –**Comp.** –**सक्थ** *a.* having coloured thighs.

अञ्जिकः N. of the son of Yadu.

अञ्जिव *a.* Slippery, smooth (?)

अञ्जिष्ठः-ष्णुः [अनक्ति स्वकिरणैः विश्वम्; अञ्ज्-इष्ठच्-इष्णुच् Uṇ. 4. 2] The sun.

अञ्जिहिषा (Desid. of अंह् 1 P.) Desire of going; Bk.

अक्त *pp.* Smeared over, bedaubed, anointed &c.; mostly as latter part of compouds; घृत°, तैल°, शोणित° &c. –**क्ता** Night.

अञ्जी [अञ्जि, वा ङीप्] 1 A blessing, auspicious desire. –2 A pounding machine (पेषणयन्त्रम्).

अञ्जीरः-रम् [अञ्ज्-बाहु॰ईरन्; perhaps a Persian word] A species of the fig-tree and its fruit. (Mar. अंजीर).

अट् 1 P. (rarely A.) (अटति, आट, अटितुम्, अटित). To wander or roam about (with loc.); roam over (sometimes with acc.); भो बटो भिक्षामट Sk. go to beg alms; आट नैकटिकाश्रमान् Bk. 4. 12; महीमटन् Dk. 38 –*desid.* अटिटिषति; –*freq.* अटाट्यते to wander about habitually, as a religious mendicant.

अट *a.* Wandering; क्षपाटः a night-roamer. ततः क्षपाटैः पृथुपिङ्गलाक्षैः खमानशे Bk 2. 30.

अटनम् Wandering, roaming; भिक्षा°, रात्रि° &c.

अटनिः-नी *f.* [अटति मौर्वीम्; अट्-अनि वा ङीप्] The notched extremity of a bow; सुमनसो नमयन्नटनी धनुः N. 4. 96; निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् R. 11. 14.

अटा [अट् वा अङ्] The habit of roaming about (as a religious mendicant); so अट्या, अटाट्या.

अटल *a.* [न. त.] Firm, steady, solid.

अटरु-रू-षः (Ety. doubtful) N. of a very useful medicinal plant, the shrub वासक Justicia Adhatoda, or Adhatoda Vasaka (Mar. अडुळसा).

अटविः-वी *f.* [अटन्ति चरमे वयसि मृगयाविहारार्थं वा यत्र; अट् अवि, वा ङीप्] A forest, wood; अटवीतोऽटवीमाहिण्डमान; Ś. 2. विन्ध्यान्तनिवारणैकसरणिविन्ध्याटवीहव्यवाट्।

अटविकः A forester = आटविकः q. v.

अट्ट् 1 A. 1 To kill. –2 To transgress, go beyond (fig. also). –*caus.* 1 To lessen, diminish. –2 To despise, condemn, disregard.

अट्ट *a.* [अट्टयति अनाद्रियते ऽन्यत् यत्र; अट्ट्-घञ्] 1 High, lofty; loud. –2 Frequent, constant (in comp). –3 Dried, dry. –**ट्टः–ट्टम्** [आधारे घञ्] 1 An apartment on the roof of upper story, a garret. –2 cf. अट्टं भित्तिचतुष्के स्यात्क्षामेऽत्यर्थे गृहान्तरे। Nm. A turret, buttress, tower; गोपुर° उत्तुङ्गसौधसुरमन्दिरगोपुराट्टसंघट्ट... ॥ Mal. 9. 1; नरेन्द्रमार्गाट्ट इव R. 6. 67, 16. 11. न सन्त्यट्टास्तथा चास्य न ह्यस्ति परिखा तथा। अतो न दुर्गमं दुर्गमयो जानीत सैनिकाः ॥ Śiva. B. 13. 78. –3 A marketplace, market (probably for हट्ट). –4 A fine linen cloth. –5 A palace, palatial building. –6 Killing, injuring. –7 Excess, superiority. –**ट्टम्** Food, boiled rice; अट्टशूला जनपदाः Mb. (अट्टं अन्नं शूलं विक्रेयं येषां ते Nīlakaṇṭha) –**Comp.** –**अट्टहासः** very loud laughter. –**स्थली** [अट्टप्रधाना स्थली शाक. त.] a place or country full of palaces &c. –**हासः,-हसितम्,-हास्यम्** [कर्म॰] a loud or boisterous laughter, a horse-laugh, cachinnation, usually of Śiva; त्र्यम्बकस्य Me. 58; गिरिश° Dk. 1. –**हासिन्** [अट्टं हसति-हस्-णिनि] 1 N. of Śiva. –2 one who laughs very loudly. –**हासकः** [अट्टहासेन कायते; कै-क] N. of a plant (कुन्द) Jasminum Multiflorum or Hirsutum (शुभ्रपुष्पत्वाच्छुभ्रहासतुल्यता).

अट्टकः An apartment on the roof of a house; a palace also.

अट्टट्ट *ind.* [अट्टोऽनादरः अट्टप्रकारः अट्टस्य गुणवाचितया द्वित्वं शकन्ध्वा॰ पररूपम् Tv.] Very loud.

अट्टनम् [अट्टयते अनाद्रियते रिपुरनेन, अट्ट् करणे ल्युट्] A weapon shaped like a discus (चक्राकारफलकास्त्रम्). –**नम्** [भावे ल्युट्] Disregard.

अट्टाट्टः [अट्टट्टवत् न पररूपम्] 1 Overbearing conduct, contempt, disdain. –2 Excess, superiority.

अट्टालः–लकः (अट्ट इव अलति पर्याप्तो भवति, अल्-अच् स्वार्थे कन्) 1 An apartment on the roof, an upper storey; a palace; साट्टाट्टालकगोपुरा Mb. 3. 15. 6; Śi. 12. 65. सर्वतोभद्रं नामाट्टालकमारुह्य Mv. 6. –2 A tower. विष्कम्भचतुरश्रमट्टालकम् Kau. A. 1. 3.

अट्टाल *a.* High, lofty.

अट्टालिका [अट्टाल, स्वार्थे कन्] 1 A palace, a lofty mansion, a house of two or more storeys. cf. Māna. –2 N. of a country. –**Comp.** –**कारः** [उपपद त.] a mason, a bricklayer (one who builds royal mansions; कुलटायां च शूद्रायां चित्रकारस्य वीर्यतः। भवेदट्टालिकाकारः पतितो जारदोषतः). –**बन्धः** [ष. त.] a kind of base or foundation in architecture; °न्धं बद्धः P. III. 4. 42.

अट् 1 U. To go.

अटिल्ला N. of a Prākrit metre.

अड् 1 P. To try, exert, attempt. 5 P. To pervade, attain (Ved.).

अडागमः (अट्+आगम) the augment a (अ) prefixed to a verb to indicate past tense (वार्तिक 1. 30. 60. 4).

अडुकः A deer: (Nigh.)

अड्ड् 1 P. 1 To join. -2 To attack. -3 To argue, infer, discern, meditate.

अड्डनम् [करणे ल्युट्] A shield. See अड्डनम्.

अड्डचलः A part of the plough.

अण् 1 P. To sound. -2 (4 A) To breathe, live (for अन्).

अण (न) क *a.* [अणति यथेच्छं नदति, अण्-अच् कुत्सायां कन् च] Very small, contemptible, mean, insignificant, wretched; पापाणके कुत्सितैः P. II. 1. 54; oft. in comp. in the sense of deterioration or contempt; ˚कुलालः Sk. a contemptible potter. cf. also मृतेऽपि त्वयि जीवन्त्या किं मयाणकभार्यया Bk. 14. 58. **-कः** A kind of bird.

अणव्यम [अणोः सूक्ष्मशस्यचीनादिकस्य भवनं क्षेत्रम्; अणु-यत्] A field of anu, see below.

अणिः *m.* **-णी** [अणति शब्दायते अण्-इन्] 1 The point of a needle. -2 A linchpin, the pin or bolt at the end of a pole of carriage. अणीकृत्वेलपत्रं च Mb 7. 202. 73. -3 A limit. -4 The corner of a house (used for killing animals &c.). **-Comp. -माण्डव्यः** [अण्या चिह्नितो माण्डव्यः] N. of a sage said to have been impaled on an अणी or linchpin. स तथान्तर्गतेनैव शूलेन व्यचरन् मुनिः। ˙˙˙अणीमाण्डव्य इति च ततो लोकेषु गीयते॥ Mb. 1. 108. 7-8.

अणु *a.* (णु-ण्वी *f.*) [अण्-उन्] Minute, small, little, atomic (opp. स्थूल, महत्); अणोरणीयान् Bg. 8. 9; सर्वोऽप्ययं नन्वणुः Bh. 3. 26. insignificantly small; अण्वपि भयम् Ms. 6. 40; अण्वपि याच्यमानः Pt. 4. 26 asked but an atom, a very small quantity, न कन्यायाः पिता विद्वान् गृह्णीयात् शुल्कमण्वपि Ms. 3. 51. **-णुः** 1 An atom, a very small particle (an exceedingly small measure); the mote in a sunbeam, the smallest perceptible quantity: अस्थूलमनण्वह्रस्वमदीर्घं ब्रह्म; अणुं पर्वतीकृ Bh. 2. 78. to magnify; cf. also 'To make mountains of molehills.' -2 An atom of time (व्यञ्जनमर्धमात्रा तदर्धम् अणु): it is said to be 54,675,000 th part of a Muhūrta (48 minutes). -3 N. of Śiva. -4 N. of very small grain such as सर्षप, चीनक &c., अनणुषु दशमांशोऽणुष्वथैकादशांशः Līlā. **-णु** *n.* the fourth part of a Mātrā. **-Comp. -अन्तः** [अणुः अन्तो यस्य] a hair-splitting question: (अण्वन्तः सूक्ष्मान्तः सुक्ष्मवस्तुनिर्णयान्तः प्रश्नः Śaṅkara). किमर्थमचारीः पशूनिच्छन्नण्वन्तानिति Br. up. 4. 1. 1. **-तैलम्** N. of a medicinal oil. **-भा** [अण्वी सूक्ष्मा भा प्रभा यस्याः सा] lightning. **-मात्र** *a.* [अणुः परिमाणं यस्य अणु-मात्रच्] of the size of an atom. **-रेणुः** [कर्म.] atomic dust. **-रेवती** [अणुः सूक्ष्मा रेवतीतारेव] N. of a plant (दन्तीवृक्ष) Croton Polyandrum. **-वादः** the doctrine of atoms, atomic theory, the theory that all material substances are primarily atoms and secondarily aggregates, and that all atoms are eternal. **-वीक्षणम्** [प. त.] 1. minute observation, observation of very minute parts. -2 [अणुः सूक्ष्मो वीक्ष्यते अनेन करणे ल्युट्] an instrument, like the microscope, enabling one to discern the smallest objects. **-व्रतानि** N. of the twelve smaller vows of laymen adhering to the Jain faith. **-व्रीहिः** [कर्म.] a fine sort of grain, rice &c.

अणिमन् *m.* [अणु-इमनिच्], **अणुता -त्वम्** 1 Minuteness, smallness, thinness, leanness, fineness. -2 Atomic nature. -3 The superhuman power of becoming as small as an atom, one of the 8 powers or Siddhis of Śiva: (अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वं च तथा कामावसायिता).

अणुक *a.* [स्वार्थे कन्] 1 Very small, atomic. -2 Subtle, too fine. -3 Acute. **-कः** A small kind of grain, See अणु.

अण्यम् A kind of head of an arrow; Dhanur.

अण्वम् Ved. A fine hole in the strainer for the Soma juice (?)

अण्वी Ved. A finger (?)

अणीयस् अणिष्ठ *a.* [अणु-ईयसुन्, इष्ठच्] Smaller, smallest, very small; अणोरणीयांसम् Bg. 8. 9 very small; अणीयसि कारणेऽनर्णायानादरो दृश्यते Dk. 142

अणुभू 1 P. To become minute or atomic.

अण्ठ् 1 A. (also अठ्) अण्ठते अटते To go, move.

अण्ठित *p. p.* 1 Gone. -2 Rained.

अण्डः-ण्डम् [अमन्ति संप्रयोगं यान्ति अनेन; अम्-ड Uṇ. 1. 113] 1 The testicles. -2 The scrotum. -3 An egg: oft. used with reference to the world as having sprung from the primordial egg of Brahman: शब्दैरनेकैरशनिप्रस्हैर्भिन्दन्निवाणुम् Rām. 5.54.33.ब्रह्माण्डच्छत्रदण्डः Dk.1.-4 The musk bag. -5 semen virile. -6 N. of Śiva. **-Comp. -आकर्षणम्** castration. **-आकार, -आकृति** *a.* [बहु.] egg-shaped, oval, elliptical. (**-रः-तिः**) an ellipse. **-कटाहः, -हम्** [अण्डं ब्रह्माण्डं कटाहमिव] the shell of the ब्रह्माण्ड or mundane egg. **-कोटरपुष्पी** [अण्डमिव कोटरे मध्ये पुष्पं यस्याः] N. of a plant अजान्त्री or नीलवुहा. **-कोशः-षः,-षकः** [प. त.] the scrotum. **-ज** *a.* [अण्डात् जायते; जन्-ड] born from an egg. रोमजं वालजं चर्म व्याघ्रजं चाण्डजं बहु Rām. 6. 75. 12. (**-जः**) 1 a bird, oviparous being: सुकाण्डजम् (काननम्) Ku. 3. 42. -2 a fish. -3 a snake. -4 a lizard. -5 Brahmā. (**-जा**) musk. **-धरः** [प. त.] N. of Śiva. **-वर्धनम्,-वृद्धिः** *f.* swelling of the scrotum, hydrocele. **-सू** *a* oviparous.

अण्डकः [अण्ड, स्वार्थे कन्] 1 The scrotum. **-कम्** [अल्पार्थे कन्] A small egg; जगदण्डकैकतरखण्डमिव Śi. 9. 9. -2 A cupola; शोभनैः पत्रवल्लिभिरण्डकैश्च विभूषितैः Matsya. P. 269. 20;

अण्डालुः [अण्डः अस्ति अस्य: अण्ड आलुच्] A fish.

अण्डीरः [अण्डः अस्ति अस्य: अण्ड-ईरच् P. V. 2. III.] A full-grown or full-developed man, a strong or powerful person: चिरादण्डीरेण त्वयि तदपि रामेण गुणितम् A. R. 4. See आण्डीर also.

अत् 1 P. (अति), अतति, अतितुम्, अत-अतित 1 To go, walk; wander, to go constantly. -2 To obtain (mostly Ved.) -3 To bind. -4 (अन्तति) To bind.

अतकः [अतति सततं गच्छति: अत्-क्वुन्] A wanderer, a passer-by, traveller.

अतनम् [अत्-ल्युट्] Going, wandering. -नः A wanderer, a passer-by.

अतज्ज्ञ a. [न तत्-जानाति] Not knowing that (तत् i. e. Brahman).

अतट a. [न. ब] -1 Having no shore or beach; precipitate, steep -टः 1 A precipice, a steep crag. -2 N. of a hill. -3 The lower part of the earth. -Comp -प्रपातः a steep precipice; a fall headlong from a precipice; a precipitate fall: मनोरथानामतटप्रपातः Ś. 6. 10. of my hopes there is a precipitate fall. (Some read the line as मनोरथा नाम तटप्रपातः and take it to mean 'verily our desires are like the crumblings of river banks'.)

अतथा ind. Not so: °उचित a. not deserving that, not used to such things: क्लेशानामतथोचितः Rām.

अतदर्हम् ind. Unjustly, undeservedly.

अतद्गुणः (Rhet.) The 'non-borrower', N. of a figure of speech in which the thing in question does not assume the quality of another, though there is a reason for it: परगुणाननुहारस्तस्य तस्मादतद्गुणः c. g. धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम्। रागपूरितेऽपि हृदये सुभग निहितो न रक्तोऽसि ॥ K. P. 10; or संगतान्यगुणानङ्गीकारमाहुरतद्गुणम्। चिरं रागिणि मच्चित्ते निहितोऽपि न रज्यसि ॥ Kuval. -Comp. -संविज्ञानः N. of a variety of Bahuvrīhi: c. g. दृष्टसमुद्रमानय; अत्र गुणीभूतस्य समुद्रस्य नानयनेऽन्वयः इति°नः बहुव्रीहिः; लम्बकर्णमानय इति तु तद्गुणसंविज्ञानः. Tv.

अतन्त्र a. [न. ब.] 1 Having no ropes or musical strings (as a musical instrument); नातन्त्री वाद्यते वीणा Rām. -2 Unrestrained; not necessarily binding; not being the object of the rule under consideration: ह्रस्वग्रहणमतन्त्रम्, दीर्घस्य °न्त्रम् Sk. Something which is not intended: on which there is no emphasis or stress (वार्तिक 2. 2. 34. 1). -3 Without formulas or empirical actions. -4 Not (having the binding force of) a scientific statement: तन्त्राविज्ञानग्रहणमतन्त्रमिति कल्प्येत। ŚB. on MS. 6. 1. 7. -न्त्रम् meaninglessness, superfluity, superfluous nature. किं तु इतरस्मिन् पक्षे बाध्येतेतरां श्रुतिः। लिङ्गशब्दस्यातन्त्रत्वात्। ŚB. on MS. 6. 4. 20.

अतन्द्र-न्द्रित-न्-न्द्र a. Alert, unwearied, careful, vigilant; अतन्द्रिता सा स्वयमेव वृक्षकान् Ku. 5. 14, R. 17. 39, H. Pr. 33.

अतनु a. More वीतप्रभावतनुरप्यतनुप्रभावः Ki. 16. 64.

अतप a. 1 Not excited, cool. -2 Unostentatious. -3 Unemployed. -पाः (pl.) N. of a class of deities among Buddhists.

अतपस्-स्क [न. ब.] One who neglects his religious austerities; अतपास्त्वनधीयानः Ms. 4. 190; an irreligious or impious man: इदं ते नातपस्काय Bg. 18. 67.

अतप्त a. Not heated &c. -Comp. -तनु a. 1 One whose body is not marked (with red mudrās &c.). -2 who has not fully mortified his body by penance. अतप्ततनूर्न तदामो अश्नुते Rv. 9. 83. 1. -3 whose body or mass is cool (?).

अतर्क a. [न. ब.] Illogical, void of reasoning. -र्कः 1 Absence of argument or reasoning, bad logic. -2 An illogical reasoner.

अतर्कित a. Unthought of, unexpected सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च Ku. 4. 22; Bh. 3. 137. °गमनेन Mu. 4. -तम् adv. Unexpectedly. -Comp. -आगत-उपनत a. occuring or befalling unexpectedly, quite accidental, sudden; °दर्शनोल्लासितलोचनया अनया Mal. 3; °उपपन्नं दर्शनम् Ku. 6. 54.

अतर्क्य a. Inconceivable: baffling thought or reasoning.

अतल a. Bottomless. -लम् [अस्य भूखण्डस्य तलं पृष्ठो° इदमोऽत्वम्] N. of a पाताल or lower region, one of the 7 Pātālas, being the first among them. -लः N. of Śiva. -Comp. -स्पृश्, -स्पर्श a. [न. तले स्पृश्यते कर्मणि क्विप्; न तलस्य स्पर्शो यत्र] bottomless, very deep, unfathomable.

अतव्यस् a. Ved. Not very strong.

अतस् ind. [इदं-तसिल्] 1 Than this; from this (having a comparative force); अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे Rv. 1. 22. 16; किमु परमतो नर्तयसि माम् Bh. 3. 6; अतोऽन्यथा Ms. 5. 31. -2 From this or that cause, hence, consequenty, so, therefore (corr. to यत्, यस्मात् or हि, expressed or understood); अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये R. 2. 43, 3. 50, Ku. 2. 5; अथातो ब्रह्मजिज्ञासा Ś. B. now therefore &c. -3 Hence, from this place; henceforth (of time or place): (-परम्, -ऊर्ध्वम्), afterwards. -4 Then (corr. of यदि-यद्).-Comp. -अर्थम्-निमित्तम् on this account, hence, for this reason. -एव for this very reason. -ऊर्ध्वम् henceforth; afterwards. -परम् (a) further on, any longer (with abl.); hereafter: निवसिष्यसि मय्येव अत ऊर्ध्वम् Bg. 12. 8. (b) beyond this, further than this; भाग्यायत्तमतःपरम् Ś. 4. 16 more than this: अतःपरं नास्ति ममोत्तरम् V. 2 now I have nothing more to say; (c) afterwards.

अतसः [अतति गच्छति सततम: अत्-असच् Un. 3. 117] 1 Wind, air. -2 The soul. -3 A garment made of the fibre of flax (°सी generally). -4 A weapon.

अतसिः Ved. [अत्-असिच्] A wandering mendicant. कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः Rv. 8. 3. 13.

अतसिका Flax; Bhāg 3. 28. 24. see अतसी 2. 3.

अतसी 1 Common flax. –2 Hemp. –3 Linseed. (Mar. अळशी) अतसीपुष्पसंकाशम् Mb. 12. 47. 90 –4 A thicket, copse (?)

अति *ind.* [अत्-इ] 1 A prefix used with adjectives and adverbs, meaning 'very', 'too', 'exceedingly', 'excessively', 'very much', and showing उत्कर्ष; Surpassing, superior अत्याश्रमानयं सर्वान् Mb. 12. 12. 6. नातिदूरे not very far from; °कृश very lean; °भृशम् very much; also with verbs or verbal forms: °सिक्तमेव भवता Sk.; स्वभावो ह्यतिरिच्यते &c. –2 (With verbs) Over, beyond; अति-इ go beyond, overstep; so °क्रम् °चर् °वह् &c. In this case अति is regarded as a preposition उपसर्ग. –3 (*a*) (With nouns or pronouns) Beyond, past, surpassing, superior to, eminent, respectable, distinguished, higher, above, (used with acc. as a कर्मप्रवचनीय, or as first member of Bah. or Tat. Comp. ज्याशब्दस्तावुभौ शब्दावति रामस्य शुश्रुवे Rām. 6. 75. 37. in which last case it has usually the sense of eminence or higher degree: अतिगो, °गार्ग्यः, = प्रशस्ता गौः, शोभनो गार्ग्यः; °राजन् an excellent king; or the sense of अतिक्रान्त must be understood with the latter member which will then stand in the accusative case; अतिमर्त्यः = मर्त्यमतिक्रान्तः; °मालः, अतिक्रान्तो मालाम्; so अतिकाय, °केशर, q. v.): , अत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः Me 1. 45. Surpassing the sun. अति देवान् कृष्णः Sk.; मानुषानतिगन्धर्वान् सर्वान्गन्धर्व लक्षये Mb; °मानुषं कर्म a deed which is beyond human power, i. e. a superhuman action; °कशः past the whip (as a horse), unmanageable; °त्यद् surpassing that; °त्वाम्, °त्वान् him or them that surpasses or surpass thee, so °मां, °यूयं &c. (*b*) (With nouns derived from roots) Extravagant, exaggerated, inordinate, excessive, extraordinary; *e. g.* °आदरः excessive regard; °आशा extravagant hope; so °भयं, °तृष्णा, °आनन्दः &c. &c.; अतिदानाद् बलिर्बद्धो नष्टो मानात्सुयोधनः। विनष्टो रावणो लौल्यादति सर्वत्र वर्जयेत्॥ cf. 'extremes are ever bad.' (*c*) Unfit, idle, improper, in the sense of असंप्रति or क्षेप 'censure'; अतिनिद्रम् = निद्रा सम्प्रति न युज्यते Sk. The गणरत्नमहोदधि gives the following senses of अतिः—विक्रमातिक्रमावृद्धिभृशार्थातिशयेष्वति। *e. g.* अतिरथः रथाधिकं विक्रमवान्; °मतिः बुद्ध्यतिक्रमः; °गहनं बुद्धेरविषयः; °तप्तं भृशतप्तं; °वेगः अतिशयिनो वेगः. Cf. also प्रकर्षे लङ्घनेऽप्यति Nm.

अतिकथा 1 An exaggerated tale. –2 Idle or meaningless talk. –थ *a.* 1 Exaggerated, incredible (अश्रद्धेय). –2 Unfit to be told. –3 Past narration or mention, dead, lost. –4 Swerving from one's caste traditions &c; lawless.

अतिकन्दकः [अतिरिक्तः कन्दो यस्य] N. of a tree हस्तिकन्द.

अतिकर्षणम् *a.* Afflicting very much, excessive exertion.

अतिकल्यम् early morning नातिकल्यं नातिसायं नातिमध्यन्दिने स्थिते। गच्छेत्... Ms. 4. 140.

अतिकश *a.* Beyond the whip, unmanageable.

अतिकामुकः A dog.

अतिकाय *a.* [अत्युत्कटः कायो यस्य]. Of an extraordinary size, gigantic. –यः N. of a Rākṣasa, son of Rāvaṇa, who was killed by Lakṣmaṇa.

अतिकृच्छ्र [प्रादि॰स.] *a.* Very difficult. –च्छ्रम्–च्छ्रः [अतिक्रान्तं कृच्छ्रं प्राजापत्यम्] Extraordinary hardship, a kind of severe penance to be finished in 12 nights एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः॥ Ms. 11. 213.

अतिकृतम् Overdone, done too much, excess; सर्वत्रातिकृतं लोके व्यसनायोपकल्पते Rām.

अतिकृतिः *f.* 1 Overdoing. –2 N. of a metre of 4 lines, each line containing 25 syllables.

अतिकेशरः [अतिरिक्तानि केशराणि यस्य] N. of an aquatic plant कुब्जक Trapa Bipinosa. (Mar. शिंगाडा)

अतिकोप *a.* Free from anger, calm, तेन चैवातिकोपेन स यज्ञः सन्धितस्तदा Mb. 7. 202. 63.

अतिक्रम् 1 U., 4 P. 1 (*a*) To step or pass beyond, get accross, go over, cross यत्कथयितुं प्रवृत्तस्तत्परित्यज्य अतिदूरमतिक्रान्तोऽस्मि K. 346 led far away from my story, rambled, made a great digression; सप्त कक्षान्तराण्यतिक्रम्य 92; निमिषमात्रेणातिदूरमतिक्रामति 120; समीपेऽप्यक्रामन्ती M. 1. going so near; अतिक्रम्य तांस्तान् विशेषान् Me. 57. (*b*) To pass over, pass by, walk past, go beyond; सेनानिवेशदेशमतिक्रम्य Dk. 4. 10; कथमतिक्रान्तमगस्त्याश्रमपदम् Mv. 7. is it passed or left behind; तस्मिन्ननतिक्रामति Ś. 7. 31. इदं कदलीगृहमतिक्रम्य दृश्यते Ratn. 3. beyond the plantain-bower; तच्चातिक्रम्य कैलासगिरिः K. 121; जम्बुद्वीपमतिक्रम्य शिशिरो नाम पर्वतः Rām; अतिक्रामत्ययम् K. 85. is going or departing. –2 To excel, surpass; exceed (in number, strength &c.); इरावतीमतिक्रामन्ती भव M. 4. अतिक्रामन्तीमिवेरावतीं प्रेक्षे M. 1; वृद्धिर्नातिक्रामति पञ्चताम् Ms. 8. 151; कर्णांसुतमप्यतिक्रान्तः Dk. 74; कलासु रूपे चाप्सरसोऽप्यतिक्रान्ता 78; surpassing, superior to; शक्तिमनतिक्रम्य यथाशक्ति Sk. –3 To transgress, violate, go beyond, overstep; जनकाग्रजन्मनोः शासनमतिक्रम्य Dk. 2; नालं पुरुषो नियतिलिखितां लेखामतिक्रमितुम् 61; एवमतिक्रान्तमर्यादे त्वयि Ve. 1, अये वात्सल्यादतिक्रामति प्रसङ्गः Māl. 6. Oh, the event through excessive affection transgresses all due limits; अतिक्रम्य सदाचारम् K. 160, 181. –4 To exclude, pass by, neglect, set aside, leave; अतिक्रामेत्प्रमत्तं या मत्तं रोगार्तमेव वा Ms. 9. 78. किं वा परिजनमतिक्रम्य भवान् संदिष्टः M. 4. प्रथितयशसां प्रबन्धानतिक्रम्य M. 1. to the exclusion of. –5 To go or pass away, elapse, roll on (as time); सा निशा अतिचक्राम Pt. 1; यथा यथा यौवनमतिचक्राम K. 59; शैशवम् 74; भवतामप्यतिक्रामति देवार्चनाविधिवेला 47: is passing away (is being violated); अतिक्रान्ते दशाहे Ms. 5. 76; also trans. allow to pass; द्वित्राणि दिनान्यतिक्रम्य

Dk. 100; अत्यक्रामममिमान्मासांस्तद्वध्यं परिचिन्तयन् Rām.; नाहार-वेलातिक्रमणीया K. 266. -6 To overcome, overpower, seize; व्यालद्विप इवास्माभिरनिक्रम्यैव दम्यसे Mv. 3. 31. by seizing or falling upon, by main force; केनापि सत्त्वेन अतिक्रम्य Ś. 6. -7 To lose; स हि स्वाम्यादतिक्रामेत् ऋतूनां प्रतिरोधनात् Ms. 9. 93. -*Caus.* To let pass, allow to go.

अतिक्रमः 1 Act of overstepping, going beyond &c. -2 (*a*) Breach of decorum or duty; अहो अतिक्रमः Māl. 7. (*b*) Transgression, violation; उपचार° केवलमुपचारातिक्रमं प्रमार्ष्टुमस्माकमयमारम्भः M. 4. 5. (*c*) Trespass; disrespect, injury, opposition; ब्राह्मण° त्यागो भवतामेव भूतये Mv. 2. 10. refraining from all trespass against Brāhmaṇas; दिशत्यपायं हि सतामतिक्रमः Ki. 14. 9; कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च Ms. 3. 63; एतस्मिन्नतिक्रमे पंरवतीयम् M. 3; गुरुजनातिक्रमात् K. 160; शशिनो ज्येष्ठातिक्रमः 56. transgression (passing through); मर्षणीयोऽयमारोहणातिक्रमः 81; वात्सल्यादतिक्रमोऽपि Mv. 1 violation (of due limits or propriety); Mv. 4. 25. -3 Lapse, passing away (of time); अनेकसंवत्सरातिक्रमेऽपि U. 4; वेला° मे कृत्वा आगतः Pt. 1; उचितवेलातिक्रमे M. 2; सन्ध्या° Rām. -4 Overcoming, conquering, surpassing; mostly with दुर्; स्वजातिर्दुरतिक्रमा, स्वभावो दुरतिक्रमः &c. -5 Neglect, omission, disregard; कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः। अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः॥ Ms. 11. 120. -6 A vigorous attack, determined onset (= अभिक्रम q. v.). -7 Excess. -8 Abuse, misapplication. -9 Imposition.

अतिक्रान्त *pp.* 1 Exceeded, surpassed, gone beyond &c.; सोऽतिक्रान्तः श्रवणविषयम् Me. 103; सुदूरमतिक्रान्तः K. 35 departed, gone; मनोरथ °दर्शना Māl. 10 beyond the reach even of desire; विचारातिक्रान्तः Mu. 5. 4 past the stage of thought; चक्षुर्विषयातिक्रान्तेषु पक्षिषु H. 1. -2 Past, gone by; °नृपति K. 5, past, former; 169 Pt. 1. 333, Pt. 2, Bh. 3. 32; °पार्थिवगुणान् Mu. 1 former kings. **-तम्** A past thing, thing of the past, the past; °तं भगवती कथयति M. 5 your ladyship is speaking of the past; °ते धैर्यमवलम्ब्यताम् U. 3; किं °उपालम्भेन H. 1; cf. 'let bygones be bygones' °योगिन् *a.* with the moon in conjunction.

अतिक्रान्ता N. of the sixth stage of the elephant's must; अतिक्रान्तावस्थो गजपतिरिदं स्थावरचरम्, जगत्सर्वं हन्तुं समभिलषति क्रोधकलुषः। Mātaṅga L. 9. 17.

अतिक्रान्तिः Transgression; स्थित्यतिक्रान्तिभीरूणि...... तोयानि Ki. 11. 54.

अतिक्रमणम् Overstepping, spending of time, excess; fault, offence; तेनातिक्रमणेन दुःखयति नः Mv. 3. 43.

अतिक्रमणीय *pot. p.* To be transgressed or violated, to be desregarded, passed by, neglected or avoided;- °यं मे सुहृद्वाक्यम् Ś. 2. इतस्तपस्विकार्यमितो गुरुजनाज्ञा। द्वयमप्यनतिक्रमणीयम्। 3, 6, 7; अनतिक्रमणीयस्य जन्ममृत्योरिवागमम् H. 4. 74.

अतिक्रुद्ध *a.* Very angry. **-द्धः** [प्रा. स.] N. of a Mantra mentioned in Tantras: (अष्टाविंशत्यक्षरो य एकत्रिंशदयापि वा। अतिक्रुद्धः स विज्ञेयो निन्दितः सर्वकर्मसु॥).

अतिक्रूर *a.* Very cruel. **-रः** [प्रा. स.] 1 A malignant planet such as Saturn, Mars &c. (क्रूरा वक्रा अतिक्रूराः). -2 N. of a Mantra in Tantras (त्रिंशदक्षरको मन्त्रस्त्रयस्त्रिंशदथापि वा। अतिक्रूरः स विज्ञेयो निन्दितः सर्वकर्मसु).

अतिक्षिप्त *a.* [क्षिप्-क्त] Thrown beyond. **-प्तम्** A kind of sprain or dislocation.

अतिखट्व *a.* Without a bedstead, able to dispense with a bed-stead.

अतिगम् 1 P. 1 To pass, elapse, pass away (as time); दशाहेऽतिगते Rām.-2 To overcome, exceed, excel, See अतिग. -3 To pass over, pass by, neglect. -4 To pass away, die. -5 To escape.

अतिग *a* [गम्-ड] (in comp.) Exceeding, going beyond, transcending, excelling, surpassing; सर्वलोक° Mu. 1. 2; किमौषधपथातिगैरुपहतो महाव्याधिभिः Mu. 6. 16. by diseases defying the powers of medicine, past the stage of physicking; बाणैर्देहातिगैः R. 12. 48 piercing through their bodies; वयो° Ms. 7. 149 advanced in years, aged; संख्यातिगाः संपदः Bh. 3. 132; वपुःप्रकर्षेण जनातिगेन Ki. 3. 2.

अतिगण्डः 1 N. of star of the 6th lunar asterism. -2 A large cheek or temple. -3 One who has large cheeks.

अतिगन्ध *a.* Having an excessive or overpowering smell. **-न्धः** 1 Sulphur. -2 N. of various plants: चम्पक, भूततृण lemon-grass & मुद्गर. (Mar. सुगंधी रोहिस गवत, सोनचांफा, बटमोगरा)

अतिगन्धालु N. of the plant पुत्रदात्री.

अतिगन्धिका (= अतिगन्धालु) (Mar. पिठवण डवला).

अतिगव *a.* [अतिक्रान्तो गाम्] 1 Very foolish, quite stupid. -2 Inexpressible, indescribable.

अतिगहन,-गह्वर *a.* Very deep, impenetrable.

अतिगुण *a.* 1 Having excellent or superior qualities. -2 Devoid of merits, worthless [गुणमतिक्रान्तः]. **-णः** Excellent merits.

अतिगुरु *a.* Very heavy (such as mercury &c.). **-रुः** A very respectable person, such as a father, mother &c. (त्रयः पुरुषस्य अतिगुरवो भवन्ति पिता माता आचार्यश्च)

अतिगुहा [अतिक्रान्ता गुहां मध्यावकाशेन] N. of the plant पृश्निपर्णी. (Mar. सालवण).

अतिगृहकम् A lofty house, a terrace भूमीगृहांश्चैत्यगृहान्गृहातिगृहकानपि Rām. 5. 12. 15.

अतिग्रह् 9 P. To take beyond the usual measure.

अतिग्रह *a.* [अतिक्रान्तो ग्रहम्] Difficult to be comprehended, incomprehensible. **-हः, -ग्राहः** 1 Object of an apprehensive organ, such as स्पर्श 'touch' the object of त्वच्, रस of जिह्वा &c. The *Grahas* are eight

in number: प्राण, वाच्, जिह्वा, चक्षुस्, श्रोत्र, मनस्, हस्तौ & त्वच्: the corresponding atigrahas being अपान, नामन्, रस, रूप, शब्द, काम, कर्मन् & स्पर्श. अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इति। अष्टौ ग्रहा अष्टावतिग्रहा इति Bṛi. Up. 3. 2. 1. –2 Right knowledge, correct apprehension. –3 Act of overtaking, surpassing &c. –4 One who siezes or takes to a very great extent.

अतिग्राह्य *a.* To be held in check, to be controlled. **–ह्यः** N. the of three libations made at the Jyotiṣṭoma sacrifice.

अतिघ [अतिशयेन हन्ति; हन्-टक्] 1 A weapon. –2 Worth.

अतिघ्न *a.* Very destructive. **–घ्नी** [अतिशयेन हन्ति दुःखम्; हन्-टक्] A happy state of complete oblivion which drowns all thought of whatever is disagreeable in the past: अतिघ्नीमानन्दस्य गत्वा Bṛi. Ār. Up. 2. 1. 9.

अतिचमू *a.* [चमूमतिक्रान्तः] Victorious over armies.

अतिचर् 1 P. 1 To transgress, violate; be unfaithful to, offend (as a wife &c.); स्वं स्वमाचारमलचारिषुः Dk. 162; यथा चाहं नातिचरे पतीन्; पुत्राः पितॄनत्यचरन्नार्यश्चात्यचरन् पतीन् Mb; धर्मे चार्थे च कामे च नातिचरामि–विवाहमन्त्र. –2 To pass by, neglect, omit. –3 To overtake, overcome: surpass, excel.

अतिचर *a.* Very changeable, transient. **–रा** [अतिक्रम्य स्वस्थानं सरोऽन्तरं गच्छति] N. of the shrub Hibiscus Mutabilis (पद्मिनी, स्थलपद्मिनी or पद्मचारिणीलता).

अतिचरणम् Excessive practice, overdoing.

अतिचारः 1 Transgression. –2 Excelling, –3 Overtaking &c. –4 Accelerated motion of planets (कुजादिपञ्चग्रहाणां स्वस्वाक्रान्तराशिषु भोगकालमुल्लङ्घ्य राश्यन्तरगमनम्); passage from one zodiacal sign to another. –5 Violation of justice Kau. A. 4.

अतिचारिन् *a.* Transgressing, surpassing &c.

अतिचिरम् *adv.* Very long; °रं मया कृतं Ratn. 1. I have been very late; नातिचिरं गतायां च तस्याम् K. 178 she had not long left when &c.

अतिच्छत्रः–त्रा, –च्छत्रका [अतिक्रान्तः छत्रं तुल्याकारेण] A mushroom, anise, principally Anesum or Anethum Sowa (Mar. शोपा) N. of another plant, Barleria Longifolia. (°त्रः is said by Amara to be जलतृणभेदः) (Mar. शेतगवत): and °त्रा = शतपुष्पा (Mar. शोप).

अतिच्छेदः (v. l. अतिच्छन्दः) Great disparity अतिच्छेदातिवादाभ्यां स्मयोऽयं समुपागतः Mb. 13. 120. 9.

अतिच्छन्दः–दस् *a.* [अतिक्रान्तः छन्दः–न्दं वा] 1 Free from worldly desires. –2 Exceeding thought or will. –3 One who violates Vedic traditions of conduct. **–स्** *f. n.* 1 N. of two classes of metres (अतिक्रान्ता छन्दः वृत्तानुसारिवर्णविन्यासभेदम्) –2 Fondness, inclination.

अतिजगती [अतिक्रान्ता जगतीं द्वादशाक्षरपादां एकाक्षराधिक्यात्] N. of a class of metres belonging to the अतिच्छन्दस् class, with 13 letters in each line (प्रथमाऽतिजगत्यासां सा द्विपञ्चाशदक्षरा.)

अतिजन *a.* [अतिक्रान्तो जनम्] Not tenanted or inhabited.

अतिजागर *a.* Always wakeful. **–रः** The black Curlew (नीलवक).

अतिजात *a.* [अतिक्रान्तो जातं–जातिं जनकं वा] (opp. अपजात) Superior to his parentage.

अतिजित *a.* Completely defeated, लोकं ह्यतिजितं कृत्वा ह्यावां हन्तुमिहेच्छति Rām. 3. 70. 5.

अतिजीव् 1 P. 1 To survive, outlive. –2 To surpass (in the mode of living); अत्यजीवदमरालकेश्वरौ R. 19. 15.

अतिजीवनम् Surviving &c.

अतिडीनम् Extraordinary flight (of birds).

अतितराम्, –अतितमाम् *ind.* [अति-तर (म) प् आमु] 1 more, higher (abl.); नृत्तादस्याः स्थितमतितरां कान्तम् M. 2. 6. –2 Exceedingly, very much; excessive, great; °सुदुःसहः R. 3. 37; °रां कान्तिमापत्स्यते Me. 15 will attain great splendour. –3 Above, higher in rank (acc.); तस्माद्वा एते देवा °रामिवान्यान् देवान् Ken. 4. 2.

अतितीव्र–तीक्ष्ण *a.* Very sharp, pungent. **–क्ष्णः** N. of the plant शोभाञ्जन. **–क्ष्णा** (Mar. मोहरी). **–व्रा** dūb grass.

अतितृष्णा Rapacity, excessive greed or desire; °ष्णा न कर्तव्या Pt. 5 One should not be too greedy. **–ष्ण** *a.* Rapacious, very greedy.

अतितॄ 1 P. To cross, pass or get over, surmount, overcome; दुर्गाण्यतितरन्ति ते H. 4. v. 1.; तयोरात्मनश्च क्षुधमत्यतार्षम् Dk. 165 satisfied or appeased hunger; तेपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः Bg. 13. 25 cross beyond death.

अतितरणम् Crossing, surmounting.

अतितारिन् *a.* Crossing, overcoming.

अतिथिः [अतति गच्छति न तिष्ठति; अत्-इथिन् Uṇ. 4. 2; *lit.* a 'traveller'; according to Manu एकरात्रं तु निवसन् अतिथिर्ब्राह्मणः स्मृतः। अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते॥ 3. 102 cf. also यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः। अकस्माद् गृहमायातः सोऽतिथिः प्रोच्यते बुधैः॥] 1 A guest (fig. also); अतिथिनेव निवेदितम् Ś. 4; कुसुमलताप्रियातिथे Ś. 6 dear or welcome guest; पुरन्दरपुरातिथिषु पितृषु Dk. 2 the guests of Indra's capital i. e. dead; so समरे यमनगरातिथिरकारि 12; धन्यानां श्रवणपथातिथित्वमेति (उक्तम्) Ratn. 2. 7 becomes a guest of, i. e. goes to or falls on the ears of the fortunate only: करोति ते मुखं तन्वि चपेटापातनातिथिम् K. P. –2 Wrath. –3 N. of a son of Kuśa and Kumudvatī and grandson of Rāma. **–Comp. –क्रिया –पूजा, –सत्कारः –सत्क्रिया, –सेवा** hospitable reception of

guests, rite of hospitality, hospitality, attention to the guests –देव *a.* [अतिथिर्देव इव पूज्यो यस्य] treating the guest as God. –धर्मः title or claim to hospitality; hospitality due to guests; गृह्यतां °र्मः Pt. 1; ऱ्यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् Ms. 3. 111 should come as guests –धर्मिन् *a.* entitled to hospitality as a guest वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ । भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ॥ Ms. 3. 112. –पतिः the host or entertainer.

अतिथिन् *a.* Ved. Travelling, wandering. साध्वर्या अतिथिनीः Rv. 10. 68. 3. –*m.* (थी) N. of a King, also called सुहोत्र and अतिथि.

अतिथिग्वः An epithet of Divodāsa whom the gods helped in overcoming Śambara.

अतिदग्ध *a.* Badly or excessively burnt. –ग्धम् A bad kind of burn.

अतिदानम् Munificence, liberality; अतिदाने बलिर्बद्धः Chān. 50.

अतिदाहः Violent inflammation.

अतिदिश् 6 P. 1 To assign, to make over, transfer. –2 To extend the application of, extend by analogy; प्रधानमल्लनिबर्हणन्यायेन अतिदिशति Ś.B.; जनपदतदवध्योश्चेति प्रकरणे ये प्रत्यया उक्तास्तेऽत्रातिदिश्यन्ते P. IV. 3. 100 Sk., IV. 1. 151 Mbh.

अतिदेशः 1 Transfer, making over, assigning. –2 (Gram.) Extended application, application by analogy, transference of one attribute to another, attraction of one case or rule to another; अतिदेशो नाम इतरधर्मस्य इतरस्मिन् प्रयोगाय आदेशः (मीमांसा); or अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्मसंहतेः । अन्यत्र कार्यतः प्राप्तिरतिदेशः स उच्यते ॥ प्राकृतात् कर्मणो यस्मात्तत्समानेषु कर्मसु । धर्मप्रवेशो येन स्यादतिदेशः स उच्यते ॥ This अतिदेश is of 5 kinds : शास्त्र°, कार्य°, निमित्त°, व्यपदेश° & रूप°. Thus in Grammar प्रकृतिवत् विकृतिः, कर्मणा कर्मवत्तुल्यक्रियः or पुंवत्, णिद्वत्, व्यपदेशिवद्भावः & इण्वदिकः are instances. गोसदृशो गवयः is an instance of रूपातिदेश or analogy; वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते Bhāṣā. P. 80. अतिदेश is generally expressed by words showing likeness or resemblance, such as इव, वत्, सदृश &c. cf. also अतिदेशो नाम ये परत्र विहिता धर्मास्तन्मतात्यान्यत्र तेषां देशः । ŚB. on MS. 7. 1. 12. अतिदेश forms the subject mattar of the 7th and the 8th अध्यायs of जैमिनि's मीमांसासूत्र. For its various divisions and subdivisions read : स च नाम्ना वचनेन वा । तत्र नाम त्रिविधमातिदेशिकं कर्मनाम, संस्कारनाम, यौगिकमिति । वचनं पुनर्द्विविधं प्रत्यक्षश्रुतमानुमानिकं च । (ŚB. ibid.).

अतिदीप्यः [अतिशयेन दीप्यते] A plant, Plumbago Rosen (रक्तचित्रक).

अतिदूर *a.* Very far; °रे, °रात्, °रेण usually with न (gen.) not far from; नातिदूरे तपोवनस्य Ś. 1.

अतिदेवः The Supreme or highest God; N. of Śiva.

अतिद्वय *a.* [द्वयमतिक्रान्तः; नास्ति द्वयं यस्य वा] Surpassing the two (बृहत्कथा and वासवदत्ता), or having no second or equal, incomparable, matchless; धिया निबद्धेयमतिद्वयी कथा K. 5.

अतिधन्वन् *m.* [अत्युत्कृष्टं धनुर्यस्य] 1 An unrivalled archer or warrior. –2 That which surpasses a मरु or desert [धन्वानमतिक्रान्तः].

अतिधर्मः The highest type of Dharma; Rām. 7.

अतिधृतिः *f.* [अतिक्रान्ता धृतिं अष्टादशाक्षरपादां वृत्तिम् एकाक्षराधिक्यात्] 1 N. of a class of metres belonging to the अतिच्छन्दस् group, consisting of 4 lines with 19 syllables in each (षट्सप्ततिस्त्वतिधृतिः). –2 Nineteen.

अतिधेनु *a.* Distinguished for his cows (P. I. 4. 3. comm.).

अतिनामन् N. of a ṛiṣi of the Saptarṣi group of the sixth Manvantara.

अतिनाष्ट्र *a.* Ved. Out of danger.

अतिनिचृ (वृ) त् *f.* N. of a Vedic metre of 3 Pādas, the number of syllables in each being respectively 7, 6 and 7; (षट्कः सप्तकयोर्मध्ये स्तोतॄणां विवाचीति । यस्याः सातिनिवृन्नाम गायत्री द्विदशाक्षरा).

अतिनिद्रा Excessive sleeping. –द्र *a.* 1 Given to excessive sleep. –2 Without sleep, sleepless. –द्रम् *ind.* Past sleeping time (निद्रा सम्प्रति न युज्यते).

अतिनिर्हारिन् *a.* Very attractive (as an attributive of smell); आमोदः सोऽतिनिर्हारी Ak.

अतिनौ–नु *a.* [अतिक्रान्तो नावम्] Disembarked, landed.

अतिपञ्चा [पञ्चवर्षमतिक्रान्ता] A girl past five.

अतिपत् 1 P. 1 To pass over; neglect, omit, transgress. –2 To fly by, beyond or over; to cross. –*Caus.* 1 To delay, neglect; see अतिपात्य below. –2 To disrespect, offend; ये सत्यमेव हि गुरूनतिपातयन्ति Mu. 3. 33. transgress, violate; अतिपातितकालसाधना Ki. 2. 42. –3 To cause to fly past or by. –4 To make ineffectual; संशमनमेवं संशोधनमतिपातयति Suśr. –5 To snatch away, drag away.

अतिपतनम् Flying past or beyond; omission, neglect, missing, transgressing; exceeding, going beyond due bounds.

अतिपातः 1 Passing away, lapse (of time); अहो काल° तः Māl. 2. –2 Neglect, omission; transgression; न चेदन्यकार्यातिपातः Ś. 1 if no other duty be neglected thereby, if it should not interfere with (the discharge of) any other duty; deviation from established laws or customs. –3 Befalling, occurrence; दुःखातिपातेन कलुषीक्रियन्ते. K. 289; जलधारातिपातः 302 falling. –4 Ill-treatment, or usage. –5 Opposition, contrariety. –6 Destruction; प्राणातिपातनिरतो निरनुक्रोशतां गतः Rām. 1. 59. 21.

अतिपातित *p. p.* 1 Put off, delayed &c. –2 Quite or entirely broken; अस्थि निःशेषतश्छिन्नमतिपातितम् Suśr. –तम् Complete fracture of a bone.

अतिपातिन् *a.* 1 Acute, running a rapid course. -2 Surpassing in speed, swifter than (in comp.); ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः R. 3. 30. अतिपाति कार्यमिदम् । पञ्चरात्रम् 2.

अतिपात्य *pot. p.* To be delayed or put off; काममनतिपात्यं धर्मकार्यं देवस्य Ś. 5.

अतिपत्रः [अतिरिक्तं बृहत् पत्रं यस्य] The teak tree, or the हस्तिकन्दवृक्ष. (Mar. साग).

अतिपथिन् *m.* A better road than common, a good road.

अतिपद् 4 A. 1 To go beyond; spring over. -2 To neglect, omit, transgress. *-Caus.* To allow to pass by.

अतिपद *a.* [अतिक्रान्तः पदम्] 1 Having no feet. -2 Too long by one foot.

अतिपत्तिः *f.* 1 Going beyond, passing, lapse; देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत् Y. 2. 169. -2 Non-performance, failure: लिङ्निमित्ते लृङ् क्रियातिपत्तौ P. III. 3. 139. (the conditional is used instead of the potential, when the non-performance of an action is implied). -3 [पत्तिम् अतिक्रान्तः] One surpassing a foot-soldier.

अतिपन्न *p. p.* Gone beyond, transgressed, missed, past &c.

अतिपर *a.* One who has vanquished his enemies. -रः A great or superior enemy.

अतिपरिचयः Excessive familiarity or intimacy; Prov अतिपरिचयादवज्ञा 'Familiarity breeds contempt.'

अतिपरोक्ष *a.* 1 Far out of sight, not discernible; °वृत्ति obsolete (words). -2 Not hidden, visible.

अतिपातकम् A very heinous sin, incest, (मातृगमनं दुहितृगमनं स्नुषागमनं पुंसां; पुत्रपितृश्वशुरगमनं च स्त्रीणां, अतिपातकानि उच्यन्ते).

अतिपादनिचृ(वृ)त् *f.* N. of a Vedic Metre of 3 pādas, the number of syllables in each being respectively 6, 8 and 7.

अतिप्रबन्धः Great continuity; °प्रहितास्त्रवृष्टिभिः R. 3. 58. very rapidly or in rapid succession.

अतिप्रगे *ind.* Very early in the morning, in the early dawn. नातिप्रगे नातिसायं न सायं प्रातराशितः (भुञ्जीत). Ms. 4. 62.

अतिप्रवृद्ध *a.* 1 Overbearing क्षत्रस्यातिप्रवृद्धस्य Ms. 6. 320. -2 Grown very much.

अतिप्रश्नः [अतिक्रम्य मर्यादां प्रश्नः] A question about transcendental truths: a vexatious or extravagant question that is asked, though a satisfactory reply has already been given: *e. g.* Vālāki's question to Yājñavalkya about Brahman in बृहदारण्यकोपनिषद्.

अतिप्रसङ्गः, -प्रसक्तिः *f.* 1 Excessive attachment; नातिप्रसङ्गः प्रमदासु कार्यः Pt. 1. 187; स्त्रीष्वतिप्रसङ्गात् Dk. 101. -2 Over-rudeness, impertinence: तद्विरमातिप्रसङ्गात् U. 5; मा भूत्पुनर्वत कथंचिदतिप्रसङ्गः Mv. 3. 16 indiscretion or imprudence; यदेतावतः परिभवातिप्रसङ्गस्य तुल्यं स्यात् Mv. 5 an insult. -3 Extraordinary or unwarrantable stretch of a (grammatical) rule, or principle; also = अतिव्याप्ति q. v. -4 A very close contact; अतिप्रसङ्गाद्विहितागसो मुहुः Ki. 8. 33 (अविच्छेदसङ्ग). -5 Prolixity; अलमतिप्रसङ्गेन Mu. 1.

अतिप्रैषितम् The time after the ceremony in which the प्रैष Mantras are used.

अतिप्रौढा A girl who has attained a marriageable age, a grown up girl.

अतिबल *a.* Very stronger or powerful; जयत्यतिबलो रामो लक्ष्मणश्च महाबलः Rām. -लः An eminent or matchless warrior (अतिरथ). -लम् 1 Great strength or power. -2 A powerful army. -ला 1 N. of a medicinal plant, Sidonia Cordifolia and Rhombifolia (Mar. चिकणा, चिकणी) -2 N. of a powerful charm or lore taught by Viśvāmitra to Rāma:-गृहाण द्वे इमे विद्ये बलामतिबलां तथा। न ते श्रमो जराऽऽवाभ्यां भविता नाङ्गवैकृतम् ॥ न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः । न च ते सदृशो राम वीर्येणान्यो भविष्यति ॥ सदेवनरनागेषु लोकेष्विह पुमांस्त्रिषु । न सौभाग्ये न दाक्षिण्ये न बुद्धिश्रुतिपौरुषे ॥ नोत्तरे प्रतिपत्तव्ये त्वत्तुल्यो वा भविष्यति । एतद्विद्याद्वयं प्राप्य यशश्चाप्यव्ययमाप्स्यसि ॥ बलामतिबलां चैव ज्ञानविज्ञानमातरौ । क्षुत्पिपासे च ते राम नात्यर्थं पीडयिष्यतः ॥ जयश्च दुर्गकान्तारप्रदेशेष्वटवीषु च । सारतां त्रिषु लोकेषु गमिष्यसि च राघव ॥ पितामहसुते ह्येते विद्ये चायुर्बलावहे । Rām. 1. 22. See तौ बलातिबलयोः प्रभावतो R. 11. 9 also.-3 N. of one of Dakṣa's daughters.

अतिबालक *a.* Childish, puerile. -कः An infant.

अतिबाला [अतिक्रान्ता बाल्यावस्थाम्] A cow two years old; वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी.

अतिबाहुः Having extraordinary arms. N. of a ऋषि of the fourteenth Manvantara. Hariv.; N. of a Gandharva; Mb.

अतिब्रह्मचर्यम् Over continence, or abstinence (opp. अतिमैथुनम्). -र्यः [अतिक्रान्तो ब्रह्मचर्यम्] One who has violated the student's life, who cohabits with women.

अतिभङ्गम् A pose in which the idol is bent in more than two or three places; आभङ्गं समभङ्गं च अतिभङ्गं त्रिधा भवेत् । Māna. 67. 95-96.

अतिभ (भा) रः 1 Excessive burden, great load: कोऽतिभारः समर्थानाम् Pt. 1. 22: इति मनसि न्यस्तचिन्तातिभारः Ratn. 3. 5: सा मुक्तकण्ठं व्यसनातिभारात् चक्रन्द R. 14. 62 through excessive grief: दुःखातिभारोऽपि लघुः स मेने Ki. 3. 33. -2 Speed. -3 Excessive obscurity (of a sentence). -Comp. -ग [अतिभारं गृहीत्वापि गच्छति] a mule.

अतिभारिक *a.* Very heavy (burdensome) राक्षसः- यदि न गुह्यं नातिभारिकं वा ततः श्रोतुमिच्छामि । Mu. after 6. 15.

अतिभीः *f.* [अति बिभेति अस्याः दर्शनात्; भी-क्विप्] Lightning flash of Indra's thunderbolt.

अतिभू 1 P. 1 To spring forth, arise: शब्दश्च घोरोऽतिबभूव Mb. –2 To surpass, excel: to overcome, subdue, overpower.

अतिभवः Surpassing, defeating, conquering.

अतिभू *a.* Surpassing all, epithet of Viṣṇu.

अतिभूमिः *f.* 1 Excess, culmination, highest pitch; °मिं गम्–या to go to excess, to reach the climax; °मिं नस्या अभिनिवेशो गमिष्यति Mal. 2; °मिं गतोनुरागः 7; तत्र सर्वलोकस्य °मिं गतः प्रवादः *ibid.* widely known, become notorious, noised abroad; °मिमयं गतो न शक्यते निवर्तयितुम K. 156; सर्वोत्सवानामतिभूमिमिवाधिशयाना 158; सर्वपौरुषातिभूमिः Dk. 30; °मिं गतेन रणरणकेन U. 1, प्रणयातिभूमिमगमन् Śi. 9. 78, 10. 80. –2 Boldness, impropriety, violation of due limits (अमर्यादा); विपदि न दूषितातिभूमिः Śi. 3. 20. –3 Eminence, superiority. –4 Extensive land.

अतिभोजनम् Voracity, surfeiting oneself, excess in eating.

अतिमङ्गल्य *a.* Very auspicious. –ल्यः N. of a tree (बिल्ववृक्ष).

अतिमतिः *f.* –मानः 1 Haughtiness, too great pride; अतिमानश्च बालश्च दुर्विनीतश्च Rām. 6. 87. 27. अतिमाने च कौरवाः Chāṇ. 50. –2 extent तरुणगणिकागणजेगीयमानयातिमानया Dk. 1.

अतिमान *a.* [मानमतिक्रान्तः] Immeasurable, very great or wide (as fame); °नया कीर्त्या Dk. 1.

अतिमर्त्य,–मानुष *a.* Superhuman. कृतवान्किल वीर्याणि सह रामेण केशवः। अतिमर्त्यानि... Bhāg 1. 1. 20.

अतिमर्याद *a.* Exceeding due limits.

अतिमर्शः Close contact.

अतिमांस *a.* [अतिशयितं मांसं यत्र] Fleshy, plump, fat, as जङ्घा, अधरोष्ठ &c.

अतिमात्र *a.* [अतिक्रान्तो मात्राम्, अतिशयिता मात्रा प्रमाणं यस्य वा] Exceeding the proper measure, inordinate, excessive: °भास्वरत्वम् M. 1. 13; (in comp.) very much, beyond measure; °दुःसहानि Ś. 4. 3 quite insupportable: °लोहिततलौ 1. 29; मुनिव्रतैस्त्वामतिमात्रकर्शिता Ku. 5. 48. –त्रम्, –मात्रशः *ind.* Beyond measure, inordinately, excessively.

अतिमाय *a.* [मायामतिक्रान्तः] Finally liberated, emancipated from the Māyā or illusion of the world. अद्भुताकृतिमिमामतिमायस्त्वं बिभर्षि करुणामय मायाम् Ki. 18. 30.

अतिमारुत *a.* Very windy. –तः, –वातः A strong hurricane, storm, violent gust of wind.

अतिमित *a.* 1 Over-measured, excessive. –2 [अ-तिमित] Not wet.

अतिमित्रम् A great friend, epithet of a very friendly constellation.

अतिमुक्त *a.* 1 Entirely free from worldly desires, finally emancipated. –2 Barren, seedless. –3 Surpassing, (a necklace of) pearls; अतिमुक्तमदग्रथितकेसरावली Mal. 5. 8. –क्तः –क्तकः 1 A kind of creeper (माधवी, Mar. कुसरी or कस्तुरमोगरा) represented as twisting itself round the mango tree and as the beloved of that tree; cf. क इदानीं सहकारमन्तरेणातिमुक्तलतां पल्लवितां सहते Ś. 3; परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि M. 4. 13. –2 N. of a tree, Dalbergia Oujeinensis (तिनिश). –3 (°क्तकः) Mountain ebony; N. of a tree called हरिमन्थ (तिन्दुकवृक्ष, तालवृक्ष also).

अतिमुक्तिः *f.* –मोक्षः Final liberation (from death). तद्येयं वाक् सोऽयमग्निः स होता स मुक्तिः सातिमुक्तिः। Bṛi. Up. 3. 1. 3. तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः सातिमुक्तिरित्यतिमोक्षा अथ संपदः। Bṛi. Up. 3. 1. 6.

अतिमृत्यु *a.* Overcoming death. –त्युः Final liberation from death (मोक्ष); तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते Up.

अतिमोदा 1 Very great fragrance. –2 N. of a plant नवमल्लिका, Jasminum Heterophyllum or Arboreum. (Mar. मोगरी)

अतियवः A kind of barley.

अतियशस् *a.* Very famous; इति तेनातियशसा राक्षसेनाभिचोदिता Rām. 6. 89. 19.

अतियात *a.* Very speedy, Mb. 3. 201. 9.

अतियोगः Over-flow, excess.

अतिरंहस् *a.* Very fleet or swift; सारङ्गेणातिरंहसा Ś. 1. 5.

अतिरक्त *a.* Very red or very much attached. –क्ता N. of one of the 7 tongues of Agni.

अतिरथः [अतिक्रान्तो रथं रथिनम्] An unrivalled warrior, fighting from his car (अमितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः); दत्वाऽभयं सोऽतिरथः Ve. 3. 28. Several Atirathas are mentioned in Bhārata Udyogaparvan (रथातिरथसंख्यानपर्व १) मद्रराजो महेष्वासः शल्यो मेऽतिरथो मतः Mb. 5. 165. 26.

अतिरभसः Great speed, precipitateness, head-long speed, rashness; °कृतानां कर्मणाम् Bh. 2. 99; दर्शन° प्रधावितेन K. 192; great hurry.

अतिरसा (Very juicy) N. of various plants, मूर्वा, रास्ना and क्लीतनक. (Mar. मोरवेल, रास्ना, ज्येष्ठमध).

अतिरागः Enthusiasm; शिरोऽतिरागाद्दग्धर्म चिकर्तिपुः Śi. 1. 49.

अतिराजन् *m.* 1 An extraordinary or excellent king. –2 One who surpasses a king.

